শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

এন্ এস্ শঠকোপাচার্য কৃতং

# ॥শ্রী শৌরিরাজভুজঙ্গম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী শৌরিরাজভুজঙ্গম্ ॥

প্রসন্নাম্বুজাক্ষং লসতকেশপাশং
    স্ফুটত্তুঙ্গনাসং স্ফুরন্মন্দহাসম্।
প্রযোগাত্তচক্রং সশঙ্খাভিরামং
    পরং পদ্মনাভং ভজে শৌরিরাজম্॥ ১ ॥

স্ফুরচ্চারুপুণ্ড্রং লসদ্যজ্ঞসূত্রং
    চলতপীতচেলং তটিত্তুল্যৱেগম্।
ক্বণন্নূপুরাঢ্য ভ্রমনপাদপদ্মং
    সুভূষোজ্জ্বলাঙ্গং ভজে শৌরিরাজম্॥ ২ ॥

ঘুমচ্চারুগন্ধং জ্বলদ্বীপরাশিং
    নদদ্বেদঘোষং ডমদ্বাদ্যনাদম্।
লসচ্চারুৱেষং মিলতসাধুসঙ্ঘং
    নমদ্ভক্তৱর্গং ভজে শৌরিরাজম্॥ ৩ ॥

পতিং পদ্মজাযাঃ ক্ষমাকান্তমীড্যং
    গতিং সজ্জনানাং গরুত্মতসুপূজ্যম্।
নমদ্ভক্তপালং নরোত্তং সমাদ্যং
    ভৱাম্ভোধিপোতং ভজে শৌরিরাজম্॥ ৪ ॥

শুভে নিত্যৱাপীতটে কৃষ্ণপুর্যাং
    সুধাসিন্ধুকন্যাযুতং পদ্মিনীশম্।
চিদানন্দমূর্তিং চিরণ্ডীমনোজ্ঞং
    সতাং বন্ধুমীশং ভজে শৌরিরাজম্॥ ৫ ॥

মুদা মাঘমাসে মহাব্ধেসসুতীর্থং
    ৱিহারং ভজন্তং সুদাশশ্চ পূজ্যম্।
মনোহারিৱেষান্ দধন্তং লসন্তং
    সদানন্দপূর্ণং ভজে শৌরিরাজম্॥ ৬ ॥

পরৱ্যূহভেদৈঃ দ্বিপঞ্চাৱতারৈঃ
তথান্যৈঃ স্বরূপৈঃ সমর্চাং ভজন্তম্।
ৱসন্তে হৃদাব্জে সতাং যোগিৱর্যৈঃ
সদা ধ্যাযমানং ভজে শৌরিরাজম্॥ ৭॥

খগেশং ভুজঙ্গং তুরঙ্গং প্লৱঙ্গং
মৃগেন্দ্রং সুমঞ্চং ৱিমানং রথং চ।
অলঙ্কারভেদৈঃ সমারুহ্য প্রীত্যা
স্বপুর্যাং চরন্তং ভজে শৌরিরাজম্॥ ৮॥

তরণ্ডে প্রদীপ্তে প্রিযাভিঃ সমেত্য
তটাকে সুরম্যে প্লুতিং সংভজন্তম্।
সুডোলাধিরূঢং স্বলঙ্কারৱেষৈঃ
মনোহারিণং তং ভজে শৌরিরাজম্॥ ৯॥

পুরে সৌধরম্যে ৱনে কৃষ্ণনাম্নি
দযাপূর্ণমূর্তিং সদা সুন্দরাঙ্গম্।
প্রিযাশ্লিষ্টগাত্রং পৃথাপুত্রমিত্রং
পরব্রহ্মরূপং ভজে শৌরিরাজম্॥ ১০॥

ভুজঙ্গপ্রযাতেন ৱৃত্তেন ভক্ত্যা
শঠারাতিনাম্না কৃতং স্তোত্রমেতত্।
রথাঙ্গ প্রযোগে প্রসিদ্ধং প্রণম্য
ৱিভুং শৌরিরাজং সুখং সন্তনোতু॥ ১১॥

॥ ইতি শ্রী শৌরিরাজভুজঙ্গং সমাপ্তম্॥

www.prapatti.com